# केन्द्रीय-विद्यालय-सङ्घटनम् , बेङ्गलूरुसंभागः

## प्रथम-उपान्त्य-परीक्षा (2025-26)

**कक्षा – 10 (दशमी)** **अवधिः- होरात्रयम्**

**विषयः - संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या-119)** **पूर्णाङ्काः**- 80

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | | |
|---|---|---|---|
| 'क' भागः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' भागः | : | पठितावबोधनम् | 30 अङ्काः |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

**'क' भागः अपठितावबोधनम् (10 अङ्काः)**

| | | |
|---|---|---|
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>भारतीयसंस्कृतिः विश्वे अद्वितीया अस्ति । अस्याः संस्कृतेः आद्यं स्वरूपं वेदेषु उपनिषत्सु च द्रष्टुं शक्नुमः । भारतस्य जीवनदर्शनं धर्माधारितम् अस्ति । भारतीयजनाः 'अतिथिदेवो भव' इति कथयन्तः आदर्शं जीवनम् पालयन्ति । गृहे आगतः अतिथिः देववत् पूज्यते । 'वसुधैव कुटुम्बकम्' इति विचारः अपि भारतस्य महान् उपदेशः अस्ति । अनेन उपदेशेन सर्वे मानवाः एकस्य एव कुटुम्बस्य सदस्याः इति भावः प्रकट्यते । भारतीयसंस्कृतिः उत्सवप्रधाना अस्ति । अत्र प्रतिवर्षम् अनेकानि पर्वाणि आचर्यन्ते । दीपावली, होलिका, रक्षाबन्धनम्, नवरात्रम्, पोङ्गल्, ओणम् इत्यादयः उत्सवाः केवलं हर्षोल्लासस्य प्रतीकाः न, अपितु सामाजिकसौहार्दस्य , सहकारस्य च द्योतकाः भवन्ति । आधुनिकयुगे अपि भारतीयसंस्कृतिः लोकानां प्रेरणास्रोतः अस्ति । अयं देशः विश्वं योगेन, आयुर्वेदेन, अध्यात्मदर्शनैः च समृद्धं कर्तुं प्रयत्नं करोति । भारतीयसंस्कृतिः अस्मान् शिक्षयति –"सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः" इति । | **10** |

| | | |
|---|---|---|
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) भारतस्य जीवनदर्शनं कथम् अस्ति ?<br>(ii) के 'अतिथिदेवो भव' इति आदर्शं जीवनम् आचरन्ति ?<br>(iii) आधुनिकयुगे अपि भारतीयसंस्कृतिः केषां प्रेरणास्रोतः अस्ति ?<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतीयसंस्कृतिः अस्मान् किं शिक्षयति ?<br>(ii) उत्सवाः कस्य द्योतकाः भवन्ति ?<br>(iii) भारतीयसंस्कृतेः आद्यं स्वरूपं कुत्र द्रष्टुं शक्नुमः ?<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**<br>**ई. यथानिर्देशम् उत्तरत –**<br>(i) 'अत्र प्रतिवर्षम् अनेकानि पर्वाणि आचर्यन्ते' । अस्मिन् वाक्ये विशेषणपदं किम् ?<br>(क) आचर्यन्ते (ख) अनेकानि (ग) पर्वाणि (घ) अत्र<br>(ii) **'लोके'** इत्यर्थे गद्यांशे प्रयुक्तं पदं चित्वा लिखत ।<br>(क) विश्वे (ख) प्रयत्नम् (ग) उत्सवाः (घ) अस्ति<br>(iii) **'आचरन्ति'** इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तमस्ति ?<br>(क) जीवनम् (ख) आदर्शम् (ग) भारतीयजनाः (घ) इति | <br>2x1=2<br><br><br><br>2x2=4<br><br><br>1<br>3x1=3 |
| | **'ख' भागः रचनात्मककार्यम् (15 अङ्काः)** | |
| **2.** | **भवान् अनिलः । स्वमित्राय सुरेशाय "पुस्तकपठनस्य लाभाः" इति विषये लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखतु –**<br>(i)..............................<br>दिनाङ्कः ....................<br>प्रियमित्र (ii) ......................<br>सस्नेहं नमस्ते ।<br>मम प्रियसख! भवतः कुशलम् अस्तु । अहम् अपि सुखेनेव (iii)................... । अद्य अहं तुभ्यं (iv).................. लाभान् विषये लिखामि । (v)................. ज्ञानस्य महासागराः सन्ति । तानि मनसः विस्तारं कुर्वन्ति । आचार्याः वदन्ति – "ग्रन्थाः नित्यं (vi).......... ज्ञानं ददति" । कथापुस्तकानि मनोरञ्जनं यच्छन्ति, इतिहासग्रन्थाः (vii)............... दृष्टिं ददति, विज्ञानग्रन्थाः नूतनम् (viii)............. प्रदर्शयन्ति । अतः नित्यं पुस्तकपठनं (ix).............. । भवतः मतम् (x)................ ज्ञातुम् इच्छामि ।<br>इति भवतः सखा<br>अनिलः । | **10x½=5** |

**मञ्जूषा -** अपि, चेन्नैतः, सुरेश, अस्मि, करणीयम्, पुस्तकपठनस्य, पुस्तकानि, नूतनं, आविष्कारं, प्राचीनजीवनस्य

**3.अ प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –** **5x1= 5**



विद्यालये, प्रधानाचार्यः, वृक्षारोपणकार्यक्रमः, महत्त्वम्, छात्राः, रोपितवान्, प्राङ्गणे, जलम्, रक्षामः, जीवनस्य, पर्यावरणम्, शुद्धम्

अथवा

**आ मञ्जूषाप्रदत्तशब्दानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –** **"स्वच्छता एव सेवा"**

**मञ्जूषा**

मानवस्य, स्वास्थ्यम्, गृहे, समाजे , कर्तव्यम् , सेवकः , कुर्मः ,अभियानम्, नागरिकाः , पालनम् , वातावरणे , रोगाः , मार्गेषु , योगदानम् , धर्मः

**4.अ मञ्जूषाप्रदत्तवाक्यैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत–** **5x1=5**

सनलः – नमस्ते मित्र! भवान् कुत्र गत्वा आगतः ?

मोहनः – (i) .................................................................. ।

सनलः – अतीव रोचकम्! पर्वते बहवः जनाः आसन् वा ?

मोहनः – (ii) .................................................................. ।

सनलः – पर्वते वातावरणं कथमासीत् ?

मोहनः – शीतलं, निर्मलवायुयुक्तं, हरितवनभरितं च अत्यन्तं रमणीयम् आसीत् ।

सनलः – (iii) .................................................................. ?

मोहनः – अतीव । शारीरिकस्वास्थ्यं मानसिकशान्तिः च लब्धम् ।

सनलः – (iv) .................................................................. ?

मोहनः – आम् । पर्वतशृङ्गाणां, हिमनदीनां, वनप्रदेशानां च ।

सनलः – (v) .................................................................. ।

**मञ्जूषा -**

(i) किं भवता छायाचित्राणि गृहीतानि आसन् ?

(ii) नमस्ते । अहं हिमालयप्रदेशे पर्वतारोहणं कृत्वा आगतवान् ।

| | | |
|---|---|---|
| | (iii) आम् । पर्यटकाः विश्वस्य विभिन्नभागेभ्यः आगच्छन्ति ।<br>(iv) अहो! एषः अनुभवः अविस्मरणीयः एव ।<br>(v) भवतः पर्वतारोहणस्य अनुभवः सुखदः अभवत् किम् ?<br>**अथवा**<br>**मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत –**<br>एकस्मिन् नगरे एकः (i)........... वसति स्म । सः नगरस्य (ii)........... नित्यं कुर्वन् साहसं च आचरति स्म । एकदा नगरस्य समीपे (iii)......... आगताः । सैनिकः (iv)............. तान् विजयितुं सज्जः अभवत् । सः (v)............. तान् पराजितवान् । नगरवासिनः तस्य पराक्रमं (vi)........ प्रसन्नाः अभवन् । सैनिकस्य साहसेन नगरं (vii).......... अभवत् । अन्ते सैनिकः (viii)............ – "कर्तव्यं न केवलं (ix)............, अपि तु राष्ट्ररक्षणाय अपि कर्तव्यम्" इति । अस्माभिः ज्ञातव्यम् – "शौर्यम् एव (x).............. आधारः" ।<br>**मञ्जूषा** - शत्रवः, दृढचेतसा, युद्धे, दृष्ट्वा, सैनिकः, रक्षणं, स्वार्थाय, राष्ट्रस्य, सुरक्षितम् , अवदत् | |
| **आ.** | | **10x½= 5** |
| | **'ग' भागः अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| 5.अ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –**<br>(i) **<u>दुष्टबुद्धिः+तु</u>** तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः ।<br>(ii) स्वाध्यायाभ्यसनं **<u>चैव</u>** वाङ्मयं तपः उच्यते ।<br>(iii) अथ केन **<u>प्रयुक्तोऽयं</u>** पापं चरति पूरुषः ।<br>(iv) **<u>नर्तनात्+अन्यत्</u>** किम् अपरं जानासि ?<br>**अथवा** | **4x1=4** |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत –**<br>(i) **<u>सम्+चयात्</u>** क्षयमायाति ।<br>(ii) **<u>पितुः+उपदेशेन</u>** असन्तुष्टः सः द्वारकापुरीम् आगच्छत् ।<br>(iii) **<u>यद्यहं</u>** कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ?<br>(iv) कस्मिंश्चित् नगरे **<u>चन्द्रो नाम</u>** भूपतिः प्रतिवसति स्म । | |
| 6. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत –**<br>(i) ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च **<u>धीगुणाः</u>** ।<br>(क) धियो गुणाः (ख) धी गुणाः (ग) धीस्य गुणाः (घ) धयस्य गुणाः<br>(ii) ततः प्रविशतः **<u>व्यासः च नारदः च</u>** ।<br>(क) व्यासनारदे (ख) व्यासनारदाः (ग) व्यासनारदौ (घ) व्यासनारद्वौ | **4x1=4** |

| | | |
|---|---|---|
| | (iii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य** ।<br>(क) समयातिक्रमम्   (ख) समयाने   (ग) अनसमये   (घ) यथासमयम्<br>(iv) **अनृतं** वदसि चेत् काकः दशेत् ।<br>(क) निर् ऋतं   (ख) न ऋतं   (ग) अनु ऋतं   (घ) अरु तं | |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत –**<br>(i) परद्रव्ये **अनासक्ता** सा न्यवेदयत् ।<br>(क) अनासक्त+ङीप्   (ख) अनासक्त+टाप्   (ग) अनासक्त+तल्  (घ) अनासक्त+त्व<br>(ii) कथमपि एतौ **निवार्+अनीयर्** ।<br>(क) निवारणीयः   (ख) निवारणीयौ   (ग) निवृत्ताः   (घ) निवारकः<br>(iii) किं ते **महत्त्वम्** ?<br>(क) महान्+तम्   (ख) महत्+त्वम्   (ग) महत्+त्व   (घ) महा+त्व<br>(iv) **बुद्धि+मतुप्** सा अवदत् ।<br>(क) बुद्धिमान्   (ख) बुद्धिवती   (ग) बुद्धिमत्यः   (घ) बुद्धिमती | **4x1=4** |
| 8.अ<br><br><br><br><br><br><br><br>आ | **वाच्यानुसारं मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत –**<br>मेघा – प्रिये ! त्वं कुत्र गच्छसि ?<br>प्रिया – इदानीं मया (i)..................... गम्यते ।<br>मेघा – गृहं गत्वा त्वया किं (ii).................... ?<br>प्रिया – तत्र (iii) ................... पुस्तकानि पठामि ।<br>**मञ्जूषा -** [ क्रियते , अहं , गृहं ]<br>**अथवा**<br>**वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत –**<br>(i) प्रीत्या कविताः (लिख्).......................... ।<br>(ii) .................. (गुरु) शिष्यान् पाठयति ।<br>(iii) मात्रा सह बालकः (मन्दिर) ....................... गच्छति । | **3x1=3** |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत –**<br>(i) मम पितामही .....................(5:45) वादने मन्दिरं गच्छति ।<br>(ii) श्वः .......................(10:15) वादने सभाकार्यक्रमाः भविष्यन्ति ।<br>(iii) राकेशः .............. (12:30) वादनपर्यन्तं योगाभ्यासम् अकरोत् । | 3x1=3 |

| | | |
|---|---|---|
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितेषु वाक्येषु रिक्तस्थानानि पूरयत –**<br>(i) अश्वाः प्राणत्राणाय .................. अधावन् ।<br>(ii) यावत् असौ क्रूरकर्मा न दण्ड्यते, ........................ अहम् इतः न गमिष्यामि ।<br>(iii) अहं चिन्तयामि यत् 'अरुणः' ................ सूर्यस्य पर्यायः।<br>(iv) अरे ! .................. कुतः कुक्कुटाः नगरेषु ।<br>**मञ्जूषा -** **अद्य , इतस्ततः , तावत् , तु** | 4x1=4 |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत –**<br>(i) <u>**ताः**</u> सूपकाराः तम् आशु ताडयन्ति स्म ।<br>(क) सः (ख) ते (ग) तौ (घ) तानि<br>(ii) अहं तस्य निग्रहं वायोः इव दुष्करं <u>**मन्यते**</u> ।<br>(क) मन्यसे (ख) मन्येते (ग) मन्ये (घ) मन्यध्वे<br>(iii) द्रौणिना मम पुत्राः <u>**भ्रातराः**</u> च हताः ।<br>(क) भ्रातरः (ख) भ्रातरौ (ग) भ्रातरि (घ) भ्राता | 3x1=3 |
| | **'घ' भागः** **पठितावबोधनम्** **(३० अङ्काः)** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>एवं बहुविधम् उपदेशं श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत, श्रमेण च शनैः शनैः प्रभूतं धनम् अर्जितवान् ।<br>अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि - खननसुयोगम् विलोकयन् स्थितः । तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः संभ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच - "अहो विचित्रः स्वप्नो मया दृष्टः । अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते" इति । तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत्- "नाथ ! विरम अस्माद् लोभात् ।"<br>**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) संभ्रान्तचित्तः प्रच्छन्नभाग्यः कां सम्बोध्य उवाच ?<br>(ii) कीदृशः प्रच्छन्नभाग्यः कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत ?<br>(iii)दुष्टबुद्धिः कस्य पूर्वमित्रम् आसीत् ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) प्रच्छन्नभाग्यः कथं धनम् अर्जितवान् ?<br>(ii) परद्रव्ये अनासक्ता बुद्धिमती किं न्यवेदयत् ?<br>(iii) दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा किमकरोत् ? | 5<br><br><br><br><br><br><br><br><br><br><br><br><br>2x1/2=1 |

| | | |
|---|---|---|
| | **III. (अ) निर्देशानुसारम् उत्तरत –**<br>(i) 'वित्तम्' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?<br>(ii) 'स्वप्नः' इत्यस्य विशेषणपदं गद्यांशात् चित्वा लिखत ।<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत –**<br>(i) 'अर्जितवान्' इति क्रियापदस्य किं कर्तृपदम् अस्ति ?<br>(ii) 'सुप्तः' इत्यस्य विपरीतार्थकपदं लिखत । | 2x1=2<br><br>2x1=2 |
| 13. | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>काम एषः क्रोध एष रजोगुणसमुद्भवः ।<br>महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।<br>शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ।<br>कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः ।।<br>**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कामः कस्मात् गुणात् संभवति ?<br>(ii) महापाप्मा कः ?<br>(iii) नरः कीदृशं वेगं सोढुं शक्नोति ?<br>**II.** पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कः नरः सुखी भवति ?<br>(ii) कम् इह वैरिणम् इति विद्धि ?<br>(iii) रजोगुणसमुद्भवौ कौ स्तः ?<br>**III. (अ) निर्देशानुसारम् उत्तरत –**<br>(i) 'विद्ध्येनमिह वैरिणम्' अत्र क्रियापदं किम् ?<br>(ii) 'मित्रम्' इत्यस्य विपरीतार्थकपदं लिखत ।<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत –**<br>(i) 'पूर्वम्' इत्यस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् ?<br>(ii) 'सुखी नरः' इत्यनयोः विशेष्यपदं चित्वा लिखत । | 5<br><br>2x½ =1<br><br>2x1=2<br><br>2x1=2 |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**काकः** - रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।<br>**राजहंसः** - शान्तं शान्तम् । अहमेव नीरक्षीरविवेकी पक्षिणां राजा ।<br>**बकः** - धिक् युष्मान् ! अहमेव सर्वशिरोमणिः ! | 5 |

| | | |
|---|---|---|
| | ( ततः प्रकृतिमाता प्रविशति )<br>**प्रकृतिः** - (सस्नेहम्) अलम् अलं मिथः कलहेन । अहं प्रकृतिः एव युष्माकं जननी । यूयं सर्वे मम प्रियाः । सर्वेषाम् एव महत्त्वं विद्यते यथासमयम् । सर्वैः एव मे शोभा । न तावत् कलहेन समयं वृथा यापयेत, मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् ।<br>**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) केन समयः वृथा न यापयितव्यः ?<br>(ii) अहमेव सर्वशिरोमणिः ! इति कः वदति ?<br>(iii) ततः का प्रविशति ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) सर्वे मिलित्वा किं करणीयम् ?<br>(ii) काकः कस्य सन्ततिं पालयति ?<br>(iii) सर्वैः एव कस्याः शोभा भवति ?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'पालयामि' इत्यस्य क्रियापदस्य कर्तृपदं किम् ?<br>(ii) 'परस्परम्' इत्यस्य समानार्थकपदं लिखत ।<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) 'सर्वेषामेव महत्त्वं विद्यते यथासमयम्' - अस्मिन् वाक्ये क्रियापदं किम् ?<br>(ii) 'अहम् एव करुणापरः पक्षिसम्राट् काकः' – इत्यत्र विशेष्यपदं चित्वा लिखत । | 2x ½ =1<br>2x1=2<br>2x1=2 |
| 15. | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>(i) **<u>भारत्याः</u>** कोशः अपूर्वः ।<br>(ii) अरुणाचले अनेके **<u>उत्सवाः</u>** मन्यन्ते ।<br>(iii) सूर्योदये **<u>तमः</u>** नश्यति ।<br>(iv) **<u>प्रचण्डज्वालः</u>** अग्निः परितः प्रसरति ।<br>(v) **<u>नेपथ्ये</u>** काकध्वनिः श्रूयते । | 5x1=5 |
| 16.अ | **मञ्जूषातः पदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।<br>धैर्यं लयसमर्थं च षडेते पाठकाः गुणाः ॥<br>**अन्वयः** – माधुर्यम्, (i)……………….. पदच्छेदः तु (ii)………………… धैर्यं लयसमर्थं च एते (iii)………………. पाठकाः (iv)………………. ।<br>**मञ्जूषा -** सुस्वरः , अक्षरव्यक्तिः , गुणाः , षट्<br>**अथवा** | 4x ½=2 |

| | | |
|---|---|---|
| आ | **मञ्जूषायाः साहाय्येन श्लोकस्य श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –**<br>यत् प्रोक्तं येन केनापि तस्य तत्वार्थनिर्णयः।<br>कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥<br>**भावार्थः** – येन केनापि (i)............... यत् पूर्वं (ii)............... अस्ति तस्य (iii)................ येन कर्तुं शक्यते सः (iv)............... कथ्यते ।<br>**मञ्जूषा** - कथितम् , नरेण, विवेकः, यथार्थनिर्णयः | |
| 17. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत –**<br>(i) द्वादश **<u>समाः</u>** पर्जन्यः तद् राष्ट्रं नाभिवर्षति ।<br>(क) मासाः (ख) वर्षाणि (ग) दिनानि (घ) समासाः<br>(ii) **‘<u>सपदि</u>** उपायः क्रियताम्‘ ।<br>(क) झटिति (ख) एकपदेन (ग) पादेन सह (घ) साहसेन<br>(iii) एकदा राजा **<u>सरोवरस्य</u>** समीपे विहरति ।<br>(क) तडागस्य (ख) नगरस्य (ग) नद्याः (घ) गृहस्य<br>(iv) **<u>सर्वदा</u>** सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ।<br>(क) सर्वं ददाति इति (ख) सर्वाधिका (ग) सर्वेषु (घ) सर्वं वदति इति | 4x1=4 |
| 18. | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत-**<br>एकदा भगवान् बोधिसत्वः नाम (i) ................ राजा अभवत् । सः नगरस्य समन्ततः धन-धान्यपूरिताः दानशालाः (ii) .................. । राज्ञः दानशीलतां (iii) .................. अन्येभ्यः देशेभ्यः अपि (iv)................... तं देशम् आगच्छन्ति स्म । नेत्रहीनयाचकस्य रूपं धृत्वा एकदा देवानाम् अधिपतिः (v) ..................... तं राजानं परीक्षितुम् आगतः । राजा तस्मै (vi)................. प्रसन्नतया प्रायच्छत् । प्रीतः शक्रः राज्ञः नेत्रद्वयमपि प्रत्यस्थापयत्, अपि चशतयोजनपर्यन्तं (vii) ................ पारं द्रष्टुं समर्थः भव इति (viii)................... अपि अयच्छत् ।<br>**मञ्जूषा** - वरम् , शिवीनां , शैलानां , अकारयत् , चक्षुर्द्वयमपि , श्रुत्वा , शक्रः , जनाः | 8x ½ =4 |